❀ श्री प्रियापरतन्त्राय श्रीजानकीवल्लभाय नमः ❀

❀ श्रीमते हनुमते नमः ❀

श्रीमत्यै श्री चारुशीलायै नमः श्रीमत्यै श्रीचन्द्रकलायै नमः

❖ ═══ ❖ ═══ ❖

श्रीस्वामी श्रीअग्रदेवाचार्य कृत

वन्देगुरुं गुणनिधिं गुणतः परं च श्रीजानकीं रघुवरं हि पुनः कृपालुम् ।
श्री वायुनन्दनमनन्त बलप्रतापं सर्वाननन्यरसिकानति रामभाजः ॥

❦ अष्ट सखियों की वन्दना ❦

श्लोक १

सर्वाषां सुसखीनां तु प्रेरिकां गुणसागरम् ।
जानक्याः परमप्रेष्ठां कोकाविद्याविशारदाम् ॥ १ ॥

श्लोक २

रसिकानामाचार्यां तां वीणावादनतत्पराम् ।
दम्पत्योः केलिमर्मज्ञां वन्दे चन्द्रकलां सखीम् ॥ २ ॥

श्लोक ३

चारुशीलां सखीं वन्दे सर्वाभरणभूषिताम् ।

गानविद्याप्रवीणानां कुशलां रसरूपिकाम् ॥ ३ ॥

श्लोक ४

सुन्दराङ्गीं हेमरूपां विमलां मन्दगामिनीम् ।

वन्दे तां सुसखीं प्रेम्णा दम्पत्योः रसवर्द्धिकाम् ॥ ४ ॥

श्लोक ५

वन्देऽनङ्गकलाभिज्ञां तां मदनकलाभिधाम् ।

मन्दोदरीं महाप्रज्ञां दम्पत्योः प्रेमदायिकाम् ॥ ५ ॥

श्लोक ६

हेमाङ्गीं चन्द्रवदनां हेमांगरूपविलक्षणाम् ।

वन्दे रसविधात्रीं तां सुन्दरीं रसरूपिणीम् ॥ ६ ॥

श्लोक ७

वन्दे चारुतरां रूपां क्षेमां क्षेमविधायिनीम् ।

मर्मज्ञां सर्वकार्येषु दम्पत्यो भावदायिकाम् ॥ ७ ॥

श्लोक ८

रसानां रसभावानां मर्मज्ञां शुभदायिकाम् ।
वन्दे सखीं तां शुभगां सुकलनां प्रकाशिकाम् ॥ ८ ॥

श्लोक ९

वाद्यविद्या प्रवीणानां कुशलां पद्मगन्धिकाम् ।
वन्दे तां सुमहाप्रज्ञामुत्फुल्लोत्पललोचनाम् ॥ ९ ॥

श्लोक १०

सीतारामयोश्चैतास्युः सख्योऽष्टौ रसरूपिकाः ।
मुख्यास्सर्वेषु कार्येषु दम्पत्योः प्राणवल्लभाः ॥ १० ॥

श्लोक ११

एता सामनुगाः यास्तु सख्यश्च गुणभूषिताः ।
वन्दे तासां पदद्वन्दं यास्स्युः नो कुलदेवताः ॥ ११ ॥

श्लोक १२

एतासां यूथमुख्यानामग्रदासेन वन्दनाम् ।
कृतां यश्च पठेन्नित्यं सभाव सुखमश्नुते ॥ १२ ॥

॥ इति श्रीस्वामी श्रीअग्रदेवाचार्य विरचिता अष्टसखी वन्दना समाप्ता ॥